# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा –** आचार्यः -१ (SEM-1) | **प्रश्नपत्रम् -२** (CC 4.1.1) | **गुणाः –** ७० |
| **विषयः-** नव्यन्यायः | | **ग्रन्थः-** पक्षता |
| **दिनाङ्कः –** १५/१२/२०१८ | | **समयः –** २ तः ५ |

### विभागः १

**प्रश्नः १ निम्नलिखितयोः द्वयोरेकस्य समाधानं सप्रसङ्गं लिखत।** ०५

१ अविच्छिन्नत्वं च अन्यूनवृत्तित्वम्' व्याख्यात।

२ पक्षतानिरूपणस्यावश्यकतां प्रतिपादयत।

**प्रश्नः २ निम्नलिखितयोः द्वयोरेकस्य निबन्धात्मिका व्याख्या कार्या।** १०

१ दीधितेः पक्षतालक्षणदलसार्थक्यं साधयत।

२ संशयस्य पक्षतावारणप्रकारं गादाधरिरीत्या निरूपयत।

### विभागः २

**प्रश्नः ३ निम्नलिखितयोः द्वयोरेकस्य उत्तरं सन्दर्भसहितं देयम्।** ०५

१ संशययोग्यतायाः पक्षतात्वं निरूपयत।

२ साधकमानस्य पक्षतात्वं साधयत।

**प्रश्नः ४ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ "धूमेनानुमिनुयामि'तीच्छायाः आलोकपरामर्शः प्रतिबन्धको न वा? व्याख्यात।

२ सिषाधयिषायाः पक्षतात्वकथने दोषान्प्रतिपाद्य वारयत।

### विभागः ३

**प्रश्नः ५ निम्नलिखितयोः द्वयोरेकस्य सन्दर्भव्याख्या देया।** ०५

१ तल्लिङ्गकानुमितौ अन्यलिङ्गकेच्छायाः प्रतिबन्धकत्वं व्याख्यात।

२ लिङ्गविशेषेणापि च नियन्त्रित्वं पक्षत्वमिति व्याख्यात।

**प्रश्नः ६ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत । १०**

१ सिषाधयिषापदार्थं निरूपयत ।

२ 'सिषाधयिषाविरहसहकृतसाधकमानाभावो पक्षता' इति पक्षतालक्षणं विवृणुत ।

## विभागः ४

**प्रश्नः ७ निम्नलिखितयोः एकस्य उत्तरं सन्दर्भसहितं देयम् । ०५**

१ लिङ्गभेदेन पक्षताभेदनिरूपणे वैशिष्ट्यं प्रतिपादयत ।

२ यत्रानुमित्सानन्तरमित्यादिना विशेषणस्य प्रयोजनं स्पष्टयत ।

**प्रश्नः ८ निम्नलिखितयोः एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत । १०**

१ साध्यसिद्धेः प्रतिबन्धकत्वं साधयत ।

२ सिद्धान्तपक्षतालक्षणं सर्वत्र ससमन्वयं व्याख्यात ।

**प्रश्नः ९ निम्नलिखितप्रश्नेषु दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु । १०**

१ को नाम पक्षः ?

२ सन्देहो हि न विशेषणं कस्मात् ?

३ बाधज्ञानप्रतिबध्यः कः ?

४ पर्वतो वह्निमान् धूमादित्यत्र हेतुतावच्छेदकं किम् ?

५ अनुकूलत्वसङ्गतिः कुत्र ?

६ सिषाधयिषामात्रं पक्षता भवति न वा ?

७ केवलान्वयिसाध्यके सुलभो बाधः कः ?

८ लिङ्गभेदेन कस्य भेदः ?

९ सिषाधयिषाशब्दव्युत्पत्तिः का ?

१० धूमवान् वह्नेरित्यत्र साध्याभावः केन सम्बन्धेन ?

११ यत्र सिद्धिः सिषाधयिषा परामर्शाः नियमेन भवन्ति तत्र अनुमितिर्भवति न वा ?

१२ अनुमितिः कुत्र प्रवर्तते ?

१३ नव्यन्यायप्रवर्तकः कः ?

१४ प्रत्यक्ष ........................ रसिकाः । पूरयत।

१५ गदाधरी केन रचिता ।

-----xxxxxx------